International Journal of Recent Research and Applied Studies
ISSN : 2349-4891
Impact Factor : 4.665

# मनुस्मृति-श्रीमद्रामायण-महाभारतानां वर्णितमानवमूल्यानि।

**Dr. Sk. Nagamastanvali**
**Guest faculty**
**Dept of puranetihasa**
**National sanskrit university**
**Tirupati**
**Cell :9492606567**

मूले भवं मूल्यमिति। मूलशब्दः “मूल रोहणे”1 इति धातोः निष्पन्नः। मनोः अपत्यानि मानवाः “तस्थापत्यम्”2 इति अण्प्रत्यये मानवः इति रूपं मानवस्य इमे धर्माः मानवीयाः इति विग्रहे “ वृद्धाच्छः”3 इति छप्रत्ययः। प्रत्ययस्य ईयादेशे “मानवीय” इति रूपं भवति। मानवीयानि तानि मूल्यानि मानवीयमूल्यानि वेदोक्तानि एव पुराणेषु इतिहासेषु स्मृतिषु च अनूदितानि। यत्र श्रुतिस्मृत्योः विरोधः तत्र श्रुतिः प्रमाणम्। यत्र अविरोधः स्मृतिरेव प्रमाणम्। पुराणान्यपि स्मृतयः एव, अतः स्मृतिरूपेषु रामायणमहाभारतमनुस्मृतिषु यानि मानवीयमूल्यानि निरूपितानि तानि आधुनिककालोपयोगीनि इति निरूपणाय अयं शोधपत्रस्य विषयः।

श्रुतिः स्मृतिः सदाचारः इत्येते धर्मस्य प्रमाणानि। स्मृतिः नामधर्मशास्त्रम्। पुरातनैः आचार्यैः पुराणान्यपि स्मृतिशब्देन व्यवहृतानि। लौकिकवाङ्मये आदिकाव्यं श्रीमद्रामायणमेव न केवलं संस्कृते सर्वासु प्रपञ्चभाषास्वपि अनूदितं दृश्यते। श्रीमद्रामायणे तादृशानि मानवीयमूल्यानि वर्तन्ते यानि विश्वजनीनानि शाश्वतानि सार्वकालिकानि च तेषु मानवीयमूल्येषु सर्वेषां निदानं श्रीराम एव।

**रामो विग्रहवान्धर्मः साधुः सत्यपराक्रमः।**

**राजा सर्वस्य लोकस्य प्रजानां मघवानिव॥4**

International Journal of Recent Research and Applied Studies
ISSN : 2349-4891
Impact Factor : 4.665

इदं वाक्यं मारीचः श्रीराम गुणश्लाघने रावणमुक्तवान्। श्रीरामः सर्वमानवरक्षणोपेतः सम्पूर्णः मानवः। श्रीमन्नारायणस्य पञ्चमानवावताराः गण्यन्ते। परशुरामः, श्रीरामः, बलरामः, श्रीकृष्णः, बुद्धश्च एतेषु पञ्चसु अवतारेषु रामावतारादेव ज्ञेयाः बहवो मानवीयगुणाः वर्तन्ते। अतः रामावतार एव सम्पूर्ण मानवमूल्यबोधकः। महाभारते कौरव पांडवानां विद्यभ्यासकालादारभ्य कौरवानां दोषान् धृतराष्ट्र जानाति। भीमाय विषदानं लाक्षगृहदहनं, द्यूतं अनुद्यूतम् इत्यादि स्वपुत्राणां दुश्चेष्टाः दृष्ट्वापि तान् न निवारयामास। हितोपदेशकारिषु विदुरादिषु पण्डितेषु मत्सरीच अभूत्। धृतराष्ट्रोपि केवलं पुत्रपक्षपातेन सर्वं नाशितवान् इति स्पष्टम्। धृतराष्ट्रस्य अविवेकः षष्ठ्यधिकैः श्लोकैः तत्र वर्णितः।5 अत्र धृतराष्ट्रस्य पक्षपातबुद्ध्या सर्वं नष्टमिति महाभारते संग्रहेण स्पष्टम्। अतः पक्षपातं विहाय धर्मस्य पक्षः एव सर्वथा अनुसरणीयः इति मानवीयमूल्यं अत्र दर्शितम्।

## मनुस्मृतौ उपदिष्टः “मनसः जयः” मानवीयमूल्यम्।

प्रायशः मनसः चाञ्चल्यादेव अनेकविधाः रोगाः भवन्ति। चित्तस्थैर्यमपि लुप्तं भवति कदाचित् उत्साहातिशयेन क्वचित् महता निर्वेदेन च मानसिकी स्थितिः नष्टा भवति। अपि च पञ्च कर्मेन्द्रियाणां पञ्च ज्ञानेन्द्रियाणाञ्च नियामकं मनः एव। इन्द्रियवाञ्छाः यद्यनियताः तदा मनसः शान्तिः न भवति। क्वचित् इन्द्रियार्थसम्पादनाय अकार्थमपि कर्तुमिच्छा भवति। एवं मनसः अनियमनात् बहवो दोषाः सञ्जायन्ते। मनसः नियमनेन सिद्धिं प्राप्नोति। एवं मनः नियम्य सुखी भवतीति मानवीयं मूल्यं स्मृतौ दर्शितम्।

मातरिगौरवम् –

International Journal of Recent Research and Applied Studies
ISSN : 2349-4891
Impact Factor : 4.665

माता शिशुं गर्भधारणादारभ्य आत्मनः प्राणेभ्यः अपि प्रियंमत्वा शिशुं रक्षति। गर्भभरणार्थं अनेकान् क्लेशान् सहते। अपि च शिशुः मातुः सकाशे एव भोजनादि क्रियां परथमभाषणं च अभ्यस्यति। अतः मातुरन्यत् दैवं न विद्यते। इदानींतनकाले पुत्राः वृद्धौ पितरौ अपेक्षेन्ते, आश्रमेषु परित्यजन्ति। मातुः क्लेशं जातं तथाविदं क्लेषं जाथायाः दृष्ट्वा तस्यामपि प्रीतिपात्रः कृतज्ञः भवति मम वंशरक्षणाय इयं एवं कष्टानि अनुभवति इति तस्यां गौरवं उत्पद्यते। अनेन भावेन सः योग्यः गृहस्थोऽपि भवति। मातरि गौरवं दर्शयेदिति मनुना मातुः आधिक्यं प्रदर्शितम्। अद्यतनकालस्य अधिकोपायोगि मानवीयमूल्यम्।

**उपाध्यायान् दशाचार्यः आचार्याणां शतं पिता।**

**सहस्रं तु पितृन्माता गौरवेणाति रिच्यते॥6**

**आर्तेषु आदरः –**

**सुवासिनीः कुमारीश्च रोगिणो गर्भिणीः स्त्रियः।**

**अतिथिभ्योऽग्र एवैतान् भोजयेदविचारयन्॥7**

**अदत्वातुथ एतेभ्यः पूर्वं भुङ्क्तेऽविचक्षणः।**

**सं भुंजानो न जानाति श्वगृध्रैर्जग्धिमात्मनः॥8**

**अर्ध स केवलं भुङ्क्ते यः पचत्यात्मकारणात्।**

**यज्ञशिष्टाज्ञानं ह्येतत्सतामन्नं विधीयते॥**

International Journal of Recent Research and Applied Studies
ISSN : 2349-4891
Impact Factor : 4.665

भोजनविषये यदि आलस्यं अपरिहार्यं भवति तदा अतिचीन् अपि अतिक्रम्य नवोढाः स्त्रियः, रोगार्ताः, गर्भिणीः स्त्रियः इत्येताः प्रथमं भोजयेत्। ततः अतिचीन् सेवकान् भोजयेत् अन्ते स्वयं भुञ्जीयात्।केवलं आत्मनः हेतोरेव पाकः हृहे न विधेयः। यथा शक्ति परेब्योपि भोजनं दद्यात्। सुवासिनीः नवोढाः इति वचनेन याः क्षुधाः सोढुं न शक्ताः ताः प्रथमं भुक्ताः भवेयुः इति वचनात् आर्तेषु आदराभिव्यक्तेः मानवीयं मूल्यमेवेदम्।

**प्राणहेतोः पापं न कार्यम् –**

अयं नागरिकः अयं लौकिकः इत्यादि वाक्यानि प्रायशः मनुष्यप्रशंसापरणिलोके बहूनि श्रूयन्ते। वृत्तिहेतोः केऽपि असत्य भाषन्ते अयोग्यं कर्म कुर्वन्ति। कौटिल्यं शठत्वमपि आचरन्ति। तत्सर्वं लोकवृत्तं उच्यते। तथा – चरणेन लौकिको भवति। “नगरात् कुत्सनप्रावीण्ययोः” इति सूत्रे नागरकाः, चोराः , लौकिका प्रतारकाः इति भाष्ये स्पष्टं। स्वजीवनार्थं परन् न प्रतारयेन ति वचनेन महत् मानवीयं मूल्यमत्र दर्शितम्। यथा वृत्या स्वल्पेनापि धनेन संतोषं प्राप्नोति तादृशीवृत्तिः आश्रयणीया वृत्तिलाभेऽपि संतोषेण विना जीवनं दुःखमयं भवतीति मानवीयमूल्यं अत्र दर्शितम्। एवं प्रकारेण समाजोपकाराय मनुस्मृतौ बहूनि मानवीयमूल्यानां प्रतिपादनं वयं द्रष्टुं शक्नुमः।

**श्रीमद्रामायणे श्रीरामे विद्यमानमानवीयमूल्यानि**

भगवतः अवतारेषु रामावतारादेव ज्ञेयाः बहवो मानवीयगुणाः वर्तन्ते अवतारप्रयोजनेषु भगवान् मनुष्यान् धर्माधर्मविवेकः, गुरुषुगौरवं, सत्यपालनम् इत्यादि सद्गुणान् शिक्षयितुम् अवतारं बिभर्तीति उदाहृतम्। भगवतः नारायणस्य एकविध अवतारेषु दशैव लोकविदिताः तेष्वपि श्रीकृष्णः श्रीरामः इति द्वौ

International Journal of Recent Research and Applied Studies
ISSN : 2349-4891
Impact Factor : 4.665

मानवानामादर्श भूतौ। तयोरपि श्रीकृष्णः भगवान् तस्य लीलाः अनुकर्तुं कोऽपि न प्रभवति। भगवतः अवतारेषु केवलश्रीरामः एव मानवधर्ममनुसरन् महिमानं न कुत्रचित् प्रदर्शितवान्। अतः श्रीरामगुणाः सर्वैः मानवैः अनुसरणीयाः, न केवलमादर्शपालकः किन्तु श्रीरामगुणाः सर्वैः मानवैः अनुसरणीयाः, न केवलमादर्शपालकः किन्तु आदर्शनायकः अपि साधारणजीवितमपि आदर्शभूतं यापितवान्। मनुष्यसम्बन्धेषु ये ये उत्तमाः गुणाः अभिलषिताः ते सर्वे रामे वर्तन्ते।

1.उत्तमपुत्रः 2. उत्तमभ्राताः 3. उत्तमपतिः 4. उत्तमपालकः 5. उत्तमसुहृद् 6. सम्पूर्णमानवः 7.सर्वदारक्षकश्च(शरणागतरक्षतः) 8. उत्तमः नायकः 9.पितुराज्ञापालनम् 10.एकपत्नीव्रतः 11. स्वामिभक्तिः

एते धर्माः मनुष्यस्य वैयक्तिकाः सामाजिकाहितकारकान् गुणानपि रामः बिभर्ति। अत एव “रामो विग्रहवान् धर्मः” इति शत्रुभिः अपि कीर्तितः।

**भूतदया –**

**मानिषादप्रतिष्ठां त्वमगमः शाश्वतीः समाः।**

**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥9**

वाल्मीकिः नारदान् रामगुणगणान् श्रुत्वा तमसा नद्यां स्नातुं जगाम। ततः रामगुणस्मरण समये एव क्रौञ्चद्वन्द्वात् केनापि व्याधेन विद्धं पुमांसं पक्षिणं ददर्श। तदा शोकतप्तः मुनिः व्याधमेव शशाप, - निषाद त्वं चिरं जीवनं प्राप्तुं नार्हसि। त्वया प्रेमयुक्तयोः पक्षिणो पुमान् पक्षी हतः पक्षिणी अपि तं विहाय जीवितं धारयितुं न शक्नोति। प्राणमूल्यं ज्ञातुं त्वमपि प्राणैः वियुक्तो भविष्यसि इति। योग्यसहृदयस्य मनः करुणसंदर्भदर्शनेन आर्द्रं भवति तत्र निरपराधिनं यो दण्डयति तं दण्डयित्वा यदि

समर्थः प्रतिकरोति नान्यः त याविधे अयोग्ये धर्मणि पुनः प्रवर्तते इति मानवीयमूल्यं अत्र दर्शितम् एव श्रीमद्रामायणे बहुविधप्रकारकानां मानवीयमूल्यानां वयं द्रष्टुं शक्नुमः।

## महाभारते वर्णित मानवीयमूल्यानि

### अहिंसा परमो धर्मः –

एष धर्मः मानवीयमूल्यरूपः बहुषु उपाख्यानेषु महाभारते दृश्यते तन्निरूपिका कथा आदिपर्वणि अष्टमध्याये वर्तते। भृगु प्रमति नामकः ऋषिः आसीत्। तस्य भार्या घृताची तयोः पुत्रः रुरुः। तस्मिन्नाश्रमे प्रमद्वरा नाम कन्या निवसति। गन्धर्वराजस्य विश्वसोः मेनकायाश्च पुत्री प्रमद्वरा। बाल्ये एव रुरु प्रमद्वरयोः विवाहः निश्चितः आसीत्। यूनोः तयोः कतिपय दिवसानाम् अग्रे विवाहः निश्चतः। अत्रान्तरे प्रमद्वरा सखीभिः, क्रीडन्ती सर्पमेकं पादेन समाक्रामत्। सर्पद्रंष्टा सा मृता। रुरुः अपि मरणे संकल्पितः। अत्रान्तरे देवदूतः कश्चन रुरुम् एवम् अवदत्। यदि तव आयुषः अर्धं कन्यायै दास्यसि सा पुनर्जीविता भवति इति रुरुरपि तस्यै स्वयुषः अर्धं दत्वा पुनः प्राणितां कृता परिणीतवान्। तदारभ्य सर्वेषु सर्पेषु जातक्रोधः रुरुः दण्डकाष्ठेन दृष्टं प्रतिसर्पं जघान। एकदा कश्चन डुण्डुभः दण्डेन ताडितः तदा सः ऋषिः भूत्वा रुरुं एवं जगात। अहं सहस्रपादनामकः ऋषिः खगमः इति मे सखा आसीत्। सः अत्यन्तः भीरुः एकदा गुणमयं सर्पं कृत्वा भीतिं उत्पादितवान्। सोऽपि कुपितः डुण्डुभः भविष्यसि इति मां शशाप। रुरु ते सापमोक्षस्य कर्ता इति शापान्तं सूचितवान्। एवं उक्त्वा ब्राह्मणः रुरवे मानवीयमूल्यानि एवं उपदिदेश। एकस्य दुष्टस्थ कृते सर्वा जातिः न नाशनीया। अहिंसा सर्व प्राणिनां श्रेष्ठो धर्मः, पण्डितः कमपि प्राणिनं कदापि न हिंस्यात् इति मुख्यं मानवीयं मूल्यं उक्तवान्।

International Journal of Recent Research and Applied Studies
ISSN : 2349-4891
Impact Factor : 4.665

**इदं चोवाच वचनं रुरुमप्रतिमौजसम्।**

**अहिंसा परमो धर्मः सर्वप्राणभृतां वरा॥**

**तस्मात् प्राणभृतः सर्वान् न हिंस्याद् ब्राह्मणः क्वचित्।**

**ब्राह्मणः सौम्य एवेह भवतीति परा श्रुतिः॥10**

एवं महाभारते मानवीयमूल्य पालनविषये अनेकानेक उदाहरणानि दृश्यन्ते। तद्यथा –

1.दुष्टान् सोदरानपि त्यजेत्। 2. क्रोधः नाशहेतुः 3. दुष्यन्तोपाख्याने सत्यस्य महत्वम् ( अथवा) गृहस्थाश्रमवैशिष्ठ्यम्। 4. सत्यप्रशंसा 5. भार्यायाः प्राशस्त्यम् 6.उपाध्याये गौरवम् 7. गुरुणां विषये अधिकारमदः कदापि न कार्यः 8. परनिन्दा न कार्या 9.दुर्बलेषु महत् बलं न प्रयुक्तव्यम् 10. विश्वासद्रोहः न कार्यः।

वस्तुतः मनुस्मृति श्रीमद्रामायण-महाभारतानां वर्णितानि यानि मानवीयमूल्यानि निरूपितानि सार्वकालिकानि सम्प्रतिकाले मानवानां कृते आदर्शप्रायानि भवन्ति। येतद् मम शोधप्रत्रान्तर्गतमानवीयमूल्यानि जनाः आचरणात् जनजीवने शान्तिश्च लोकहितं भविष्यतीति चिन्तयित्वा विरमामि विस्तरात्।

International Journal of Recent Research and Applied Studies
ISSN : 2349-4891
Impact Factor : 4.665

## References –

1. चुरादि. 70
2. सिद्धान्तकौमुदी – 1088
3. अष्टाध्यायी – 4.2.114, सिद्धान्तकौमुदी 1337
4. श्रीमद्रामायणे अयोध्याकाण्डः – 37/13
5. महाभारते आदिपर्व – 1/150, 216
6. मनुस्मृतिः – 2/145
7. मनुस्मृतिः – 3/114, 115
8. मनुस्मृतिः – 3/118
9. श्रीमद्रामायणे बालकाण्डः – 2/15
10. महाभारते आदिपर्व – 11/13,14